https://www.holy-bhagavad-gita.org/chapter/9/verse/24

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।

न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते || 24||

*ahaṁ hi sarva-yajñānāṁ bhoktā cha prabhureva cha*

*na tu mām abhijānanti tattvenātaśh chyavanti te*

यान्ति देवव्रता देवान्पितॄ न्यान्ति पितृव्रताः ।

भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ||25||

*yānti deva-vratā devān pitṝīn yānti pitṛi-vratāḥ*

*bhūtāni yānti bhūtejyā yānti mad-yājino 'pi mām*

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।

तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः || 26||

*patraṁ puṣhpaṁ phalaṁ toyaṁ yo me bhaktyā prayachchhati*

*tadahaṁ bhaktyupahṛitam aśhnāmi prayatātmanaḥ*

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।

यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् || 27||

*yat karoṣhi yad aśhnāsi yaj juhoṣhi dadāsi yat*

*yat tapasyasi kaunteya tat kuruṣhva mad-arpaṇam*

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।

संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ।। 28।।

*śhubhāśhubha-phalair evaṁ mokṣhyase karma-bandhanaiḥ*

*sannyāsa-yoga-yuktātmā vimukto mām upaiṣhyasi*

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।

ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ।। 29।।

*samo 'haṁ sarva-bhūteṣhu na me dveṣhyo 'sti na priyaḥ*

*ye bhajanti tu māṁ bhaktyā mayi te teṣhu chāpyaham*

अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।

साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ।। 30।।

*api chet su-durāchāro bhajate mām ananya-bhāk*

*sādhur eva sa mantavyaḥ samyag vyavasito hi saḥ*

क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति ।

कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ।। 31।।

*kṣhipraṁ bhavati dharmātmā śhaśhvach-chhāntiṁ nigachchhati*

*kaunteya pratijānīhi na me bhaktaḥ praṇaśhyati*

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।

स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् || **32**||

*māṁ hi pārtha vyapāśhritya ye 'pi syuḥ pāpa-yonayaḥ*

*striyo vaiśhyās tathā śhūdrās, te 'pi yānti parāṁ gatim*

किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ।

अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् || **33**||

*kiṁ punar brāhmaṇāḥ puṇyā bhaktā rājarṣhayas tathā*

*anityam asukhaṁ lokam imaṁ prāpya bhajasva mām*

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।

मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः || **34**||

*man-manā bhava mad-bhakto mad-yājī māṁ namaskuru*

*mām evaiṣhyasi yuktvaivam ātmānaṁ mat-parāyaṇaḥ*